# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (सत्रम्-१) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - फलितज्योतिषम् | (C.C.- ४.१.२. New ) | समयः -८.०० तः ११.०० |
| दिनाङ्कः - ११/१०/२०१९ | सन्दर्भग्रन्थः - रमलनवरत्नम्। | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु। ०५**

(क) मेषसंक्रान्तिदिवसे ताभ्यां प्रश्नञ्च कारयेत्।
पट्टिकायां शुभदिने प्रश्नार्थं पातयेत् सुधीः॥

(ख) लह्यानं पाशके योज्यं स्वेष्टदेवं गुरुं स्मरन्।
पाशकं मन्त्रपेदादौ सप्तवारं ततः क्षिपेत्॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखत। १०**

(क) शकलानां स्वरूपविचारः।

(ख) पाशक्षेपणविधिः।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्योपरि सान्वयं व्याख्यां करोतु। ०५**

(क) बलस्य कार्यारम्भस्य प्रयत्नस्य मुखस्य च
नृपनीतेश्च शान्तेश्च ज्ञेयानि प्रथमात् गृहात्॥

(ख) चतुर्थे रिपुगेहे च दाखिलं साबितं यदि।
तथापि मुष्ट्यां वक्तव्यं वस्त्वास्ति च मतान्तरे॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु। १०**

(क) मुष्ट्यां वस्तुविचारः।

(ख) शकलानां वर्णविचारः।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु। ०५**

(क) अशुभेऽपि स्वगेहे च शकुनस्य क्रमेण वै।
तदापि वृद्धिदं ज्ञेयं सवले च विशेषतः॥

(ख) मासखण्डदशार्द्धाभ्यां खण्डं जातं फलाह्वयम्।
तत्खण्डवशतो वाच्यं फलं सूक्ष्मं दशाख्यके॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु। १०**

(क) मूकप्रश्नकथनम्।

(ख) चौरादिनामकथनम्।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां करोतु । ०५**

(क) पूषापुष्यपुनर्वसूत्तरमृगा मैत्राश्विहस्तत्रयी
रोहिण्यः श्रवणा द्विरागमविधौ मूलं धनिष्ठा तथा ।
कुम्भाजालिरविश्च वर्षमसमं त्यक्त्वा कुजार्की तुला-
कन्यामन्मथमीनयुक्तमकरा लग्नानि यात्रातिथिः ॥

(ख) पूर्वाद्राभरणीभुजङ्गवरूणांस्त्यक्त्वा कुजार्की तथा
नन्दा पर्व च सप्तमीमपि तथा रिक्तामपि द्वादशीम् ।
स्यात् षष्ठाष्टममासि चाद्यमशनं स्त्रीणां पुनः पञ्चमे
गोकन्याझषमन्मथेषु धवले पक्षे च योगे शुभे ॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(क) विवाहमुहूर्तः ।

(ख) गृहप्रवेशः ।

## संयुक्तान्वितिः

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) रमलनवरत्नम् इत्यस्य रचनाकारः कः ?

(२) षोडशशकलेषु प्रथमशकलस्य नाम लिखत ।

(३) लह्यानशकलस्य लक्षणं चिह्नं वा लिखत ।

(४) लह्यानशकलस्य राशिः कोऽस्ति ?

(५) रमलशास्त्रे कति पाशाः भवन्ति ?

(६)  इति कस्य शकलस्य चिह्नमस्ति ?

(७) शकुनादि कति क्रमाः भवन्ति ?

(८) फरहाशकलस्य को राशिः ?

(९) लह्यानशकलस्य तत्त्वं किमस्ति ?

(१०) फरहाशकलस्य वर्णः (रङ्गम्) कोऽस्ति ?

(११) अङ्कीशकलस्य चिह्नं लिखत ।

(१२) विवाहस्य शुभमासानां नामानि लिखत ।

(१३) विवाहसंस्कारस्य शुभनक्षत्राणां नामानि लिखत ।

(१४) कन्यायाः अन्नप्राशनं कस्मिन् मासे शुभो भवति ?

(१५) विद्यारम्भसंस्कारः कस्मिन् वर्षे शुभो भवति ?

----oooo----